तिबाला द्विवार्षिकी। अतः परन्तु सा गौः स्यात्तरुणी दन्तजन्मनीति” अङ्गिरोवचने द्विवर्षोत्तरकाले गवां दन्तजन्मकथनं पशुमात्रोपलक्षणम् अतैव काले (आदाँता) इति लोके प्रसिद्धिः सा च गवामिव महिषाश्वादीनामपि तथैव। अत् अन्ते यस्य ब०। अकारान्तशब्दे पु०।

**अदब्ध** दनुभ–क्त न०त०। अहिंसिते “अदब्धेभिः पायुभिः पाह्यस्मानिति” ऋ०१,९५,९, अदब्धैरहिंसितैरिति भा०। “अदब्धासुर्भ्राजमानोह्येव” इति वेदः।

**अदब्धायु** पु० अदब्धेन अहिंसनेन आयौति आ–या–कु–३त०। अहिंसायुक्ते “अग्नेऽदब्धायो अशीततमेति यजु० अदब्धायो। अहिंसित ! यजमान इति वेददीपः।

**अदभ** त्रि० न दभ्यते कर्म्मणि बा०क। अहिंस्ये “तादृधन्तावनु द्यून्मर्त्ताय देवावदभा” इति ऋ०५,८६,५ अदभौ अहिंस्यौ इति भा०।

**अदभ्र** त्रि० दनुभ–रक् दभ्रमल्पं न०त०। अनल्पे “अदभ्रदर्भामधिशय्य स स्थलीमिति” भारविः।

**अदम्भ** पु० अभावार्थे न०त०। दम्भाभावे। नास्तिदम्भो यस्य। दम्भरहिते त्रि०। “अदम्भं शठतां हीनं कर्म्म कुर्य्यादलोलुप” इतिपुरा०।

**अदम्य** त्रि० न दम्यतेऽसौ। अदमनीये। गवामेकवर्षपर्य्यन्त कालेऽदम्यता “पादस्याप्राप्तके देय इति” स्मृतिः अप्राप्तकः अप्राप्तदम्यावस्थ इति” रघु० तेन “एकवर्षे गवि हते कृच्छ्रपादो विधीयते” इत्येकवाक्यतया एकवर्षकालपर्य्यन्तकाल एव वत्सानामदम्यत्वं प्रतीयते।

**अदर्शन** न० न दर्शनम् अभावार्थे न०त०। दर्शनाभावे लोपे, विनाशे च “लोपोऽदर्शनमिति” पा०। नास्ति दर्शनं यस्याः ब०। दर्शनाविषये दृष्टिशून्ये च त्रि०।

**अदल** पु० दल्यते भिद्यते इति दलं पत्रं दल–कर्म्मणि घञ् न०ब०। दलशून्ये (हिजल) इति ख्याते वृक्षे। पत्रशून्ये वृक्षमात्रे त्रि०। घृतकुमार्य्यां स्त्री। दलः खण्डः। तच्छून्ये त्रि०।

**अदस्** त्रि० न दस्यते उत्क्षिप्यतेऽङ्गुलिर्यत्र इदन्तया निर्द्धारणाय पुरोवर्त्तिन्येवाङ्गुलिनिर्द्देशः सम्भवति नापुरोवर्त्तिनि। न+दस्–क्विप्। अपुरोवर्त्तिनि परोक्षे ज्ञाते वस्तुनि। सर्वनामता। “अमुष्य विद्या रसनाग्रनर्त्तकीति” नैषधम्। परलोके “नचामुत्र फलप्रद इति” पुरा०। “इदमस्तु सन्निकृष्टं समीपतरवर्त्ति चैतदोरूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादित्युक्ते” विप्रकृष्टे एवास्य प्रयोगः। यच्छब्दाकाङ्क्षिततच्छब्दाप्रयोगेऽस्य तदर्थबोधकता। यथा “आनन्दयति ते नेत्रे योऽधुनासौ समागत इत्यादौ”। अतएवोक्तं काव्यप्रकाशे इदंशब्दवददः–शब्दस्तच्छब्दार्थमभिधत्ते इत्युक्तम्” यच्छब्दस्य तु निकटस्थितत्वे तच्छब्दस्यापि प्रसिद्धपरामर्षितेति वदता च तेन तच्छब्दस्येव इदमदःशब्दयोरपि प्रसिद्धार्थकता तत्रैवोक्ता। यथा “करबालकरालदोःसहायो युधि योऽसौ विजयार्जुनैकमल्लः। यदि भूपतिना स तत्र कार्य्यैः” इत्यादौ प्रसिद्धार्थकता। अन्यथा स इत्यनेन पुनरुक्तत्वापत्तेः अतएव दर्पणकृता “आनन्दयति ते नेत्रे योऽसौ सुभ्रु! समागत” इति पद्ये यच्छब्दस्य सन्निकृष्टतया तच्छार्थावाचकत्वमाशङ्क्य आनन्दयति ते नेत्रे योऽधुनासौ समागत इत्येवं पाठःपरिवर्त्तितः। यच्छब्दे नानाकाङ्क्षितत्वे तु न तच्छब्दार्थाभिधायित्वं किन्तु प्रसिद्धाद्यभिधायकता यथा “असौ मरुच्चुम्बितचारुकेशर इत्यादौ” नात्र तच्छब्दार्थप्रतीतिरिति काव्य प्रकाशे उक्तम्। तथा च यच्छब्देनाकाङ्क्षास्थले एव यच्छब्दस्यासन्निकृष्टतयोपात्तस्यादःशब्दस्य तच्छब्दार्थकता नान्यथेति सुस्थितम्। “अदोऽनुपदेशे इति” सूत्रनिर्द्देशात् अनुपदेशे अदसः गतिसंज्ञा तेन अदः कृत्यादः कृतमित्यादौ गतित्वेन समासे ल्यप्। परं प्रति उपदेशे तु अदः कृत्वा अदः कुरु इत्यादौ न गतित्वम्। अस्य गतिसंज्ञात्वे नाव्ययत्वमपि। तेनाव्ययपूर्व्वकतया ल्यप् अर्थस्तु अदःशब्दस्येव।

**अदातृ** त्रि० न०त०। दातृभिन्ने “अदाता वंशदोषेणेति” पुरा०। “अदाता पुरुषस्त्यागी धनं संत्यज्य गच्छतीति” नीति०। स्त्रियां ङीप्।

**अदान** न० न दानमभावार्थे न०त०। दानाभावे। नास्तिदानं त्यागोमदजलं वा यस्य। दानशून्ये त्रि०। मदजलशून्ये गजे पु०। “सदा दानपरिक्षीणः शस्तएव करीश्वरः। अदानः पीनकायस्तु निन्द्यतएव गर्द्दभ” इति।

**अदान्त** त्रि० न०त०। इन्द्रियदमनाकारके अविनीते च “अदान्तोविषयासक्त” इति पुरा०।

**अदाभ्य** त्रि० दम्भ ण्यत् नलोपोपधावृद्धी न०त०। अहिंस्ये। “यत्ते सोमादाभ्यं नाम जागृवीति य० ७,२, हे सोम! ते त्वदीयमहिंसितं जागृवि जागरणशीलमिति वेददीपः।

**अदाय** त्रि० नास्ति दायो येषाम्। दायानर्हेपतितज्ञात्यादौ। “अदायास्त्र स्त्रियोमता” इति स्मृतिः।